लातीति मालो विष्णुः तं व्यततीति । अच् । इत्यमरटीकायां भरतः ॥ ) स्वनामख्यात-पुष्पलता । तत्पर्य्यायः । सुमना २ जातिः ३ । इत्यमरः ॥ सुमनाः ४ जाती ५ । इति भरतः ॥ ( यथा, शिशुपालवधे । ११ । १७ ।
"व्यलयति मदनाग्निं मालतीनां रजोभिः ।" )
अस्या गुणाः । कफपित्तमुखरोगव्रणकृमिकुष्ठ-नाशित्वम् । इति राजवल्लभः ॥ तस्या उत्-पत्तिर्यथा,—

आद्याशक्तिरुवाच ।

'अहमेतत्त्रिधा भिन्ना तिष्ठामि त्रिविधैर्गुणैः ।
गौरी लक्ष्मीः स्वधा चेति रजःसत्त्वतमोगुणैः ॥
तत्र गत्वा तथा कार्य्यं विधास्यन्ति च ताः सुराः ॥

नारद उवाच ।

इत्युक्तामिति तां वाचमन्तर्द्धानमगात्ततः ।
देवानां विस्मयोत्फुल्लनेत्राणाञ्च तदा नृप ! ॥
ततः सर्व्वेऽपि ते देवा गत्वा तद्वाक्यचोदिताः ।
गौरीं लक्ष्मीं स्वधाञ्चैव प्रणेमुर्भक्तितत्पराः ॥
तास्तथा तान् सुरान् दृष्ट्वा प्रणतान् भक्तवत्सलाः ।
बीजानि प्रददुस्तेभ्यो वाक्यानि जगदुस्तथा ॥

देव्य ऊचुः ।

इमानि देवा बीजानि विष्णुर्यत्रावतिष्ठति ।
निर्व्वपध्वं ततः कार्य्यं भवतां सिद्धिमेष्यति ॥

नारद उवाच ।

ततः प्रहृष्टाः सुरसिद्धसंघाः
प्रगृह्य बीजानि विचिन्त्यपुञ्च ।
विन्दारिकाभूमितले स यत्र
विष्णुः सदा तिष्ठति सौख्यदृप्तिः ॥

नारद उवाच ।

चिक्षिपुस्तत्र बीजेभ्यो वनस्पत्यस्त्रयोऽभवन् ।
धात्री च मालती चैव तुलसी च नृपोत्तम ! ॥
धात्र्युद्भवा स्मृता धात्री माभवा मालती स्मृता ।
गौरीभवा च तुलसी रजःसत्त्वतमोगुणाः ॥"
इति पाद्मे उत्तरखण्डे १४६।१५० अध्यायौ ॥*॥
युवती । कामभाली । विशल्या । ज्योत्स्ना । निशा । नदीविशेषः । इति हेमचन्द्रः ।४।२१३।
(सुवर्चला मालतीत्यर्थः । तत्पर्य्यायो यथा,—
"चक्राको मालती चौमी रुद्रपत्नी सुवर्चला ॥"
पुष्पार्थे पर्य्यायो यथा,—
"मालती सुमना जातिः ।" इत्युभे वैद्यकरत्न-मालायाम् ॥ तथाच ।
जातिर्जाती च सुमना मालती राजपुत्त्रिका ।
चेतिका हृद्यगन्धा च सा पीता स्वर्णजातिका ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मालतीतीरजः, पुं, (मालती तदाख्या नदी तस्या-स्तीरे जायते इति । जन् + डः ।) टङ्कणः । इति हेमचन्द्रः । ४ । १० ॥

मालतीतीरसम्भवं, क्ली, ( मालत्या तीरे सम्भवो-ऽस्य । ) श्वेतटङ्कणम् । इति राजनिर्घण्टः ॥

मालतीपत्त्रिका, स्त्री, (मालत्याः पत्त्रीव । मालती-पत्त्र + प्रतिकृतौ कन् टाप् अत इत्वम् । ) जातीपत्री । इति राजनिर्घण्टः ॥ ( जाती-पत्रीशब्देऽस्य विषयो ज्ञातव्यः ॥)

मालतीफलं, क्ली, ( मालत्याः फलम् । ) जाती-फलम् । इति राजनिर्घण्टः ॥ (तथास्य पर्य्यायः ।
"जातीफलं जातिकोषं मालतीफलमित्यपि ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे )

मालयः, पुं, ( मा शोभा तस्याः लयः आस्पदम् ।) चन्दनवृक्षः । इति त्रिकाण्डशेषः ॥ मलय-सम्बन्धिनि, त्रि ॥ (यथा, नलोदये । २ । ३७ ।
"तनुरुद्धटोत्तमालया तया सुवोत्तमालया ।
व्यहारि शीतमालयानिलावधूतमालया ॥"
क्ली, अभिसारस्थानभेदः । यथा, साहित्य-दर्पणे । ३ । अभिसारिकाप्रकरणे ।
"क्षेत्रं वाटी भग्नदेवालयो दूतीगृहं वनम् ।
मालयञ्च श्मशानञ्च नद्यादीनां तटी तथा ॥")

मालवः, पुं, ( मालः उन्नतक्षेत्रमस्त्यत्र । माल + "केशाद्वोऽन्यतरस्याम् ।" ५।२।१०६ । इत्यत्र "अन्येभ्योऽपि दृश्यन्ते ।" इति काशिकोक्तेः वप्रत्ययः । ) अवन्तिदेशः । इति हेमचन्द्रः । ४ । २२ ॥ मालबोया इति हिन्दीभाषा ॥ ( यथा, मात्स्ये । ११३ । ४४ ॥
"अङ्गा वङ्गा मद्गुरका अन्तर्गिरि बहिर्गिरी ।
सुह्मोत्तराः प्रविजया मार्गवागेयमालवाः ॥"
मालवेषु जात इत्यण् । तद्देशजे, त्रि ।) रागविशेषः । स च षड्रागाणां मध्ये प्रथम-रागः । मतान्तरे भैरवरागोऽयम् । यथा,—
"आदौ मालवरागेन्द्रस्ततो मल्लारसंज्ञितः ।
श्रीरागस्तस्य पश्चाद्वै वसन्तस्तदनन्तरम् ॥
हिल्लोलश्चाथ कर्णाट एते रागाः प्रकीर्त्तिताः ॥"
तस्य स्वरूपं यथा,—
"नितम्बिनीचुम्बितवक्त्रपद्मः
शुकद्युतिः कुण्डलवान् प्रमत्तः ।
सङ्गीतशालां प्रविशन् प्रदोषे
मालाधरो मालवरागराजः ॥"
इति सङ्गीतदामोदरः ॥
(मालव्यां तन्नामिकायां सावित्रीमातरि जातः इत्यण् । अश्वपतेराज्ञो मालव्यां जातः पुत्त्र-गणः । यथा, महाभारते । ३ । २९६ । ५८ ।
"पितुश्च ते पुत्त्रशतं भविता तव मातरि ।
मालव्यां मालवा नाम शाश्वताः पुत्त्रपौत्त्रिणः ॥
भ्रातरस्ते भविष्यन्ति क्षत्त्रियास्त्रिदशोपमाः ॥"
स्त्री, नदीविशेषः । यथा, महाभारते । १३ । १६५ । २५ ।
"हिरण्वती वितस्ता च तथा प्लक्षवती नदी ।
वेदस्मृतिर्वेदवती मालवाथाश्ववत्यपि ॥")

मालविका, स्त्री, ( मालवेषु जाता । मालव + ठक् टाप् ।) त्रिवृत् । इति राजनिर्घण्टः ॥

मालसी, स्त्री, ( मल + स्वार्थे अण् । मलं स्यति नाशयति । सो + डः । ङीप् ।) केशपुष्पवृक्षः । यथा,—
'मालसी दुर्गपुष्पी च बालाची केशधारिणी ॥'
इति शब्दचन्द्रिका ॥
रागिणीविशेषः । सा तु मालवरागस्य पत्नी । यथा,—
"धानुषी मालसी रामकिरी च सिन्धुड़ा तथा ।
आस्त्रवारी भैरवी च मालवस्य प्रिया इमाः ॥"
इति हारीतः ॥
मतान्तरे मेघरागस्य पत्नी । यथा,—
"ललिता मालसी गौड़ी नाटी देवकिरी तथा ।
मेघरागस्य रागिण्यो भवन्तीमाः सुमध्यमाः ॥"
तस्याः स्वरूपं यथा,—
"नीलारविन्दस्य दलानि बाला
विधारयन्ती तनुदेहयष्टिः ।
मालूरवृक्षस्य तले निषण्णा
श्यामा मृदुर्मालसिका प्रदिष्टा ॥"
तस्या गानसमयो यथा,—
"इन्द्रोत्थानात् समारभ्य यावद्दुर्गामहोत्सवम् ।
गेया भवेद्बुधैर्नित्यं मालसी सा मनोहरा ॥"
अपि च ।
"गान्धारी दीपिका चैव कल्याणी पुरवी तथा ।
अस्त्रवारी कानड़ा च गौरी केदारमाहिड़ा ॥
माधवी मालसी नाटी भूपाली सिन्धुड़ा तथा ।
सायाह्ने रागिणीरेताः प्रगायन्ति चतुर्द्दश ॥"
इति सङ्गीतदामोदरः ॥

माला, स्त्री, ( माति मानहेतुर्भवतीति । मा + "कृवेन्द्राग्रवज्रे ।" उणा० २।२८ । इति रन् रस्य लत्वम् टाप् च । यद्वा, मां शोभां लाति इति । ला + कः टाप् ।) श्रेणी । तत्पर्य्यायः । राजिः २ लेखा ३ तती ४ वीची ५ आली ६ आवलिः ७ पङ्क्तिः ८ धारणी ९ । इति हेमचन्द्रः । ३।३१५ । मूर्द्ध्नि न्यस्तपुष्पदाम । अन्यत्राप्युपचारात् ॥ तत्पर्य्यायः । माल्यम् २ स्रक् ३ । इत्यमरः । २। ६ ।१३५ ॥ मालिका ४ मालाका ५ मालका ६ । इति शब्दरत्नावली ॥ गणनिका ७ गुणा-न्तिका ८ । इति वराहपुराणम् ॥ सा त्रिविधा यथा,—
"माला तु त्रिविधा देवि ! वर्णाक्षपर्व्वभेदतः ।"
इति मत्स्यसूक्तवचनम् ॥ * ॥
अथ मालानिर्णयः । तत्र करमाला । सनत्-कुमारसंहितायाम् ।
'तर्ज्जनी मध्यमानामा कनिष्ठा चेति ताः क्रमात् ॥
तिस्रोऽङ्गुल्यस्त्रिपर्व्वाणो मध्यमा चैकपर्व्विका ।
पर्व्वद्वयं मध्यमाया मेरुत्वेनोपकल्पयेत् ॥
क्रममाह ।
अनामामध्यमारभ्य कनिष्ठादित एव च ।
तर्ज्जनीमूलपर्य्यन्तं दशपर्व्वसु संजपेत् ॥
तथा,—
अनामामूलमारभ्य कनिष्ठादित एव च ।
तर्ज्जनीमध्यपर्य्यन्तमष्टपर्व्वसु संजपेत् ॥